माह वशिष्ठः । "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षड़ेते आततायिनः" । विष्णु-कात्यायनौ । उद्यतासिविषाग्निश्च शापोद्यतकरस्तथा । आथर्व्वणेन हन्तारं पिशुनञ्चैव राजसु । भार्य्यातिक्रमिणञ्चैव विद्यात्सप्ताततायिनः । यशोवित्तहरानन्याना-हुर्द्धर्म्मार्थहारकान्" । विशेषमाह कात्यायनः । "अनात्मारितपूर्व्वोयस्त्वपराधे प्रवर्त्तते । प्राणद्रव्यापहारे च प्रवृत्तस्याततायिता" । अनात्मारितोऽनपकृतः । तेन पूर्व्वकृतापकारस्य मारणोद्यतस्य नाततायिता । तेन प्रत्युपकारकवधे दोषएव । ननु आततायिनोरपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः । "नाततायिबधे दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् प्रायश्चित्तं कुर्य्यात्" । तथा भविष्ये । "घातकानपि गोविप्रान्न हन्याद्वै कदाचनेति" । अतः पूर्व्ववचनविरोधः । सत्यम् । अत्र व्यवस्थामाह कात्यायनः । "आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः । बधस्तत्र तु नैव स्यात् पापे हीने बधोमतः" । जन्मपदेन जातिः कुलञ्चोच्यते । तेन हन्तृपेक्षया तपोविद्याजातिकुलैरुत्कृष्टोनाततायी बध्यस्तदन्योबध्यएव । अतएव भगवद्गीताया माह । "पापमेवाश्रयेदस्मान् हत्वैतानाततायिन" इति । एतान् भीष्मादीन् अत्यन्तोत्कृष्टगुणानित्यर्थः । एवंभूताततायिनश्चाहनने फलमप्याह बृहस्पतिः । "आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम् । यो न हन्याद्बधप्राप्तं सोऽश्वमेधफलं लभेत्" । यद्यपि "गुरुं बहुश्रुतं हन्यादिति" । श्रूयते । तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्याप्युत्कर्षसम्भवः । एवं बहुश्रुतादावपि । एवमधमवर्णस्योत्तमवर्णो न बध्यः । पूर्व्वकृतापकारविषयं वा सुमन्तुवचनम् । गौराततायप्यपि न बध्यः । "नखिनां शृङ्गिणाञ्चैव दंष्ट्रिणाञ्चाततायिनाम् । हस्त्यश्वानान्तथान्येषां बधे हन्ता न दोषभागिति" कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम् । विशेषमाह कात्यायनः । उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते । निवृत्तस्तु यदास्माद्ग्रहणं न बधःस्मृतः" इत्यन्तेन । तत्रत्यभ्रूणशब्दार्थमाह देवलः "अनूचानो गुणोपेतो यज्ञस्वाध्यायसंयुतः । भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः" । मिताक्षरायामपि "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिबधे दोषो हन्तुर्भवति कश्चन । प्रच्छन्नं वा प्रकाशं वा मन्युस्तन्मन्युमृच्छति" । तथा "आततायिनमायान्तमपि वेदान्तगं रणे । जिघांसन्तञ्जिघांसीयान्न तेन ब्रह्महा भवेत्" इत्याद्यर्थशास्त्रम् । 'इयं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् । कामतो ब्राह्मणबधे निष्कृतिर्न विधीयत" इत्यादि धर्म्मशास्त्रमनयोर्विरोधे धर्म्मशास्त्रं बलवदिति युक्तम् । अनयोरेकविषयत्वासम्भवेन विरोधाभावान्न बलाबलचिन्ता अवतरति । तथा हि "शस्त्रं द्विजातिभिर्ग्राह्यम्धर्म्मोयत्रोपरुध्यते" इत्युपक्रम्य "आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्करे । स्त्रीविप्राभ्युपपत्तौ च धर्म्मेण घ्नन् दुष्यती"त्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायाञ्च आततायिनमकूटशस्त्रेण घ्नन् न दण्डभागित्युक्त्वा तस्यार्थवादार्थमिदमुच्यते । "गुरुं वा बालवृद्धौ वेत्यादि" । गुर्वादीनत्यन्ताबध्यानप्याततायिनोहन्यात् किमुतान्यानिति । वाशब्दश्रवणादपि वेदान्तगमित्यत्राप्यपिशब्दस्य श्रवणान्न गुर्वादीनां बध्यत्वप्रतीतिः "नाततायिबधे दोषोऽन्यत्र गोब्राह्मणबधादिति" सुमन्तुवचनात् । "आचार्य्यं च प्रवक्तारम् पितरं मातरं गुरुम् । न हिंस्याद्ब्राह्मणान् गाश्च सर्व्वांश्चैव तपस्विन" इति मनुवचनाच्च । आचार्य्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवन्नान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् । "नाततायिबधे दोषोहन्तुर्भवति कश्चन" इत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव । यतः "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षड़ेते आततायिनः" तथा "उद्यतासिविषाग्निश्च शापोद्यतकरस्तथा । आथर्व्वणेन हन्ता च पिशुनश्चापि राजनि । भार्य्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान् विजानीयात्सर्व्वानेवाततायिन" इति सामान्येनाततायिनो दर्शिताः । अतश्च ब्राह्मणादय आततायिन आत्मादित्राणार्थं हिंसानभिसन्धिना निवार्य्यमाणाः प्रमादाद्यदि विपद्येरंस्तत्र लघु प्रायश्चित्तं राजदण्डाभावश्चेति" । ब्राह्मणाद्याततायिबधे दोष उक्तः । अतएव भीष्मादीनामाततायिनामपि हननेन "अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे" इति भारते युधिष्ठिरादीनां महापातकित्वमुक्तम् ।

**आतनि** त्रि० आ—तन—इन् । आतानके विस्तारके । "त्वं विशिक्षुरसि यज्ञमातनिः" ऋ० २,१,१० ।

**आतप्** त्रि० आतपति आ+तप—क्विप् । तापके "परिवामरुषावयोघृणावरन्त आतपः" ऋ० ५,७३,५ । "आतपः आतापिनः" भा० ।

**आतप** पु० आ—तप—घ । १उद्द्योते, २निविड़किरणे रौद्रे च । "आतपः कटुकोरूक्षः स्वेदमूर्च्छातृषा-